**अणिमादिप्रद** ( aṇimādi-prada ) *adj.* bestowing supernatural powers *aṇiman* etc. सर्वसिद्धिप्रदमणिमादिप्रदम् SetuBa. 42. 23.

**अणिमादिप्रसिद्धि** ( aṇimādi-prasiddhi ) *f.* acquisition of the super natural powers *aṇiman* etc. वस्वश्रं शाङ्करे कुण्डमणिमादिप्रसिद्धये MṛgenraT. ii. 6. 49.

**अणिमादिप्रादुर्भाव** ( aṇimādi-prādurbhāva ) *m.* appearance of the supernatural powers *aṇiman* and others स्थूलस्वरूपसूक्ष्मान्वयत्वसंयमाद् भूतजय: । ततोऽणिमादिप्रादुर्भाव: कायसम्पत्तद्धर्मानभिघातश्च YogSū. 3. 45; अणिमादिप्रादुर्भाव इत्यनेनैव तद्धर्मानभिघातसिद्धौ पुनरुपादानं कायसिद्धिवदेतत्सूत्रोपबद्धसकलविषयसंयमफलवत्त्वज्ञापनाय TattvVai. 170. 20 (*on* 3. 45); ऐश्वर्यमपि बुद्धिधर्म: यतोऽणिमादिप्रादुर्भाव: SāṁkhyaTaKau. 344. 1 (*on* 23); बुद्धिधर्मादैश्वर्यादणिमादिप्रादुर्भाव: SāṁkhyaTaPra. 173. 11; ततश्च भूतजयादणिमादिप्रादुर्भाव: कायसंपद् भूतधर्मानभिघातश्चेत्येतत् सिद्धित्रयं भवति YogSā. 57. 18(3)

**अणिमादिप्राप्ति** ( aṇimādi-prāpti ) *f.* acquisition of the supernatural powers *aṇiman* and others हिरण्यगर्भोपासनेन ह्यणिमादिप्राप्ति: फलम् ĪśopBh. 18. 2 (*on* 14)

**अणिमादिप्रेप्सा** ( aṇimādi-prepsā ) *f.* desire to attain the supernatural powers *aṇiman* and others चित्तैकाग्र्यं यथा योगी महायासेन साधयेत् । अणिमादिप्रेप्सयैवं विविच्यात् स्वं मुमुक्षया PañcDa. 7. 208.

**अणिमादिफलप्रदा** ( aṇimādiphala-pradā ) *adj.* (*f.*) yielding the result in the form of the supernatural powers *aṇiman* and others सा सार्धमैहिकैर्भोगैरणिमादिफलप्रदा ( प्रतिष्ठा ) PāraS. 15. 8.

**अणिमादिभाज्** ( aṇimādi-bhāj ) *adj.* achieving the supernatural powers *aṇiman* and others व्रत्याशन: शस्तदेशे जपकोट्याणिमादिभाक् ĪśānS'iPa. i. 35. 59.

**अणिमादिभूति** ( aṇimādi-bhūti ) *f.* wealth of supernatural powers beginning with *aṇiman* अणिमादिभूतयोऽस्या: स्वीकृतकमनोयकामिनीरूपा: ( परमेश्वर्या: ) KāmKaVi. 49.

**अणिमादिमहासिद्धि** ( aṇimādi-mahāsiddhi ) *f.* great supernatural powers beginning with *aṇiman* अणिमादिमहासिद्धिनि:साधारणवैभव: । कथं त्वाममरैरन्यैरुपेक्षे समभिष्टुतम् SkandP. i(3. 2). 14. 29.

**अणिमादियोग** ( aṇimādi-yoga ) *m.* conjunction with (i. e. possession of) the superhuman powers of *aṇiman* etc. ( मुक्ति: ) नाणिमादियोगोऽपि SāṁkhyaPraSū. 5. 82.

**अणिमादिरूप** ( aṇimādi-rūpa ) *adj.* [*f.* -ā] in the form of the superhuman powers like *aṇiman* etc. देवानां जन्मसिद्धिरणिमादिरूपा YogSā. 64. 8(3); फलमाकाशगमनादिरूपा गति: । अणिमादिरूपमैश्वर्यमपि मदीयात् गमनादैश्वर्यादधिकम् LaCandr. 898. 27; अन्यदपि यत् सिद्धिसन्तानमणिमादिरूपम्…तत् सर्वमनेनैव प्रयोगेण साधयेत् SetuBa. 123. 20.

**अणिमादिलक्षण** ( aṇimādi-lakṣaṇa ) *adj.* characterised by ( the superhuman powers like ) *aṇiman* etc. न हि तदा योगिनामणिमादिलक्षणमैश्वर्यं याज्ञवल्क्यस्योक्तं भवति Aparā. 2. 22 (*on* 1. 1)

**अणिमादिविभूति** ( aṇimādi-vibhūti ) *f.* supernatural powers like *aṇiman* etc. विदेहनिर्माणशक्तेरणिमादिविभूतेश्चावश्याभ्युपगन्तव्यत्वात् NyāyKuA. i. 142. 8; यत्पादपद्मस्मरणादणिमादिविभूतय: । भवन्ति भविनामस्तु भूतनाथ: स भूतये RājMār. 42. 19; VīraMi. 4. 5 (*on* 1. 1)

**अणिमादिशक्ति** ( aṇimādi-śakti ) *f.* supernatural powers like *aṇiman* etc. तत्राणिमादिशक्तीनां परिवारवरूथिनी BrahmāṇḍP. iii. 25. 59; अणिमादिशक्तिर्मोह: S'vetaUBh. 77. 7 (*on* 1. 4); दैवी स्थितिरणिमादिशक्तियोगोऽनेकप्रकार: ManuBh. ii. 445. 8 ( *on* 11. 236 ); तत्र स्थितं शक्तिचक्रमणिमादिशक्तिकदम्बं स्वमुद्रया योजयेत् SetuBa. 97. 24; कालखण्डा: षण्णवतिर्भवन्ति । ते क्रमेणाणिमादिशक्तिरूपा इति SetuBa. 175. 20; 162. 2.

**अणिमादिसंपत्ति** ( aṇimādi-sampatti ) *f.* attainment of supernatural powers like *aṇiman* etc. वर्षान्तरसञ्चरणमेव हि दुष्करम् । कुतो लोकान्तरसञ्चार: । …अणिमादिसम्पत्तेरेवमपि स्यादिति चेन्न NyāyKuA. i. 142. 5.

**अणिमादिसिद्ध** ( aṇimādi-siddha ) *adj.* possessed of supernatural powers like *aṇiman* etc. कुण्डमध्ये । वेतालसंज्ञां गुलिकां लभेत तां धारयन् स्यादणिमादिसिद्ध: ĪśānS'iPa. i. 15. 127; नन्दन्तु साधककुलान्यणिमादिसिद्धा: NityoNi. 61. 27.

**अणिमादिसिद्धि** ( aṇimādi-siddhi ) *f.* supernatural powers *aṇiman* and others अणिमादिसिद्धीर्मुद्रा नमामि TripuMāPūSt.(S'aṅ. ) 89; ददर्श स महेशानम् …अणिमादिसिद्धिभिश्च मूर्ताभि: समुपासितम् BṛDharmaP. i. 38. 72; अपजहसुरवाप्तसंयमा: स्वान् अपरिमितानणिमादिसिद्धिभेदान् Yādavā. 24. 68; NyāySu.(Ja.) 277B. 4 (*on* ii. 1. 2); आत्मजिज्ञासुभिरयमेव संयम: संयमान्तराण्यणिमादिसिद्धिहेतुभूतानि विहाय कर्तव्य इति YogSā. 55. 13(3); SāṁkhyaPraBh. 146. 23 (*on* 5. 128); VīraMi. 903. 4 ( *on* 3. 202 ); गिरिश: । अणिमादिसिद्धिमनुगृह्य पुनर्नयति स यक्षवनितास्त्रिदिवम् S'ivLī. 17. 45; 17. 42; अणिमादिसिद्धयो मामवन्तु देवीप्रभास्वरूपिण्य: LalitāStaRa. 126; 127.

**अणिमाद्य** ( aṇimādya ) *adj.* [*f.* -ā] **1** ( supernatural powers ) beginning with *aṇiman* तामिस्रो नामाष्टगुणैश्वर्येऽणिमाद्ये दशविधे च विषये यो द्वेषोऽप्रतिहतस्तत्र यद् दु:खमुत्पद्यते TattvSa. (12) 132. 1; ऐश्वर्येणाणिमाद्येन…ऋषीनभिभवन्ति च VāyuP. i. 57. 76; ऐश्वर्यमणिमाद्यं हि कारणं ह्यष्टलक्षणम् VāyuP. ii. 40. 97 = BrahmāṇḍP. iii. 3. 75; VāyuP. i. 20. 22; ii. 4. 123; ii. 5. 63; ऐश्वर्येणाणिमाद्येन …ऋषींस्तेऽभिभवन्ति हि MatsyaP. 142. 68; BrahmāṇḍP. i. 29. 82; सिद्धयो ह्यणिमाद्याश्च…आगत्य ते महादेवीं तुष्टुवु: BrahmāṇḍP. iii. 14. 7; महाकलकलं चक्रुरणिमाद्या: पर:शतम् BrahmāṇḍP. iii. 25. 59; ii. 3. 64; iii. 31. 94; iii. 36. 46; अणिमाद्यां प्रयच्छन्ति तदङ्गानि महात्मनाम् PauṣkS. 19. 108; SaundL. 30; 95; अणिमाद्यात्मकमैश्वर्यं मुक्तानां भवितुमर्हति BrahmSūBh.( S'aṅ. ) 858. 14 (*on* iv. 4. 17); सिध्यन्ति सिद्धय: सर्वा अणिमाद्या: समृद्धय: SarvaVeSāSaṁ. 143; TripuVePāSt. 57; 74; SkandP. iii(3). 7. 39; vi. 262. 72; न हि समाधय: … अणिमाद्या: कार्यसिद्धी: … आसादितवन्त: Kiraṇā. 285. 10; योगैश्वर्यं चाष्टगुणं स्यादणिमाद्यम् ĪśānS'iPa. i. 23. 47; Upask. 388. 7 (*on* ix. 1. 13); अणिमाद्याश्च सिद्धय: । मन्त्रराजस्य पुरतश्चरन्ति BṛBrahmaS. i. 6. 9; LalitāSaBh. 71. 9 (*on* 106); **2** (Āvaraṇa deities) like Aṇimā etc. प्रभा अणिमाद्या आवरणदेवता: LalitāSaBh. 103. 26 (*on* 137)

**अणिमाद्यखिलदेवता** ( aṇimādy-akhiladevatā ) *f.* all the deities like Aṇimā etc. अणिमाद्यखिलदेवतानामासनस्थाने प्रत्येकं वागुराकारेण सर्वमातृका: पुन:पुनर्लेख्या इत्यन्ये SetuBa. 122. 27.

**अणिमाद्यावरणशक्ति** ( aṇimādy-āvaraṇaśakti ) *f.* defied energies of the *āvaraṇa* like Aṇimā etc. न त्वेता वृत्तयोऽणिमाद्यावरणशक्तय: इति भ्रमितव्यम् SetuBa. 175. 10.

**अणिमाद्यष्टक** ( aṇimādy-aṣṭaka ) *n.* group of eight (supernatural powers) beginning with *aṇiman* जपान्तमखिलं कर्म…प्रयच्छति । अणिमाद्यष्टकं चैव PauṣkS. 32. 149; परमेश्वरा: … अणिमाद्यष्टकोपेता: PauṣkS. 36. 385; 33. 145; सृष्टश्चतुर्मुख: … अणिमाद्यष्टकोपेत: JayāS. 2. 38 = PāraS. 10. 116; सदाणिमाद्यष्टकसेवनीये … सवित्रि लोकस्य नमो नमस्ते BrahmāṇḍP. iii. 30. 18; अणिमाद्यष्टकं तस्य योगसिद्धस्य जायते SarvaSiSaṁ. 10. 68; योगिनी … अणिमाद्यष्टकच्छलात् । अपश्यत् फलितां स्थाणावहिंसाद्यष्टपुष्पिकाम् PṛthvīVi. 5. 38.

**अणिमाद्यैश्वर्य** ( aṇimādy-aiśvarya ) *n.* supernatural powers beginning with *aṇiman* यत्राष्टगुणमणिमाद्यैश्वर्यं तत्र सङ्गादिन्द्रादयो देवा न मोक्षं प्राप्नुवन्ति SāṁkhyaKāBh. 27. 11 ( *on* 48 ); अन्यदेव पृथगाहु: फलम् … अणिमाद्यैश्वर्यलक्षणम् ĪśopBh. 17. 9 (*on* 13); इतरेषामणिमाद्यैश्वर्यं श्रूयते BrahmSūBh.(S'aṅ.) 858. 19 ( *on* iv. 4. 17 ); योगोऽप्यणिमाद्यैश्वर्यप्राप्तिफलक: BrahmSūBh.(S'aṅ.) 208. 7 (*on* i. 3. 33); KāṭhUBh. 128. 19 (*on* 2. 11); BṛĀraUBhVā. iv. 4. 131; अणिमाद्यैश्वर्ययोगिनो वा…अन्तर्यामिता स्यात् Bhām. 180. 13 (*on* i. 2. 18); GītāBh.( Rā. ) 499. 1 (*on* 10. 3); NītiMā. 32. 1; 67. 2; Aparā. 2. 23 (*on* 1. 1); अणिमाद्यैश्वर्यसंबन्धोऽपि न मुक्ति: SāṁkhyaPraBh. 134. 30 (*on* 5. 82)

**अणिमाद्वितीयावरण** ( aṇimā-dvitīyāvaraṇa ) *n.* the second enclosure of the (deified) supernatural power Aṇimā केशव: रुद्र: चन्द्रमा: भास्कर: … भूतपति: भीम: अणिमाद्वितीयावरणम् VīraMi.( Rājanīti. ) 385. 8.

**अणिमामय** ( aṇimā-maya ) *adj.* consisting of the divinity Aṇimā कल्पयेदासनं पश्चात् पद्माख्यं प्रणवेन तत् । तस्य पूर्वदलं साक्षादणिमामयमक्षरम् LiṅgaP. i. 27. 25; S'ivaP. ii(1). 11. 45 (51A. 4)

**अणिमाव्यूह** ( aṇimā-vyūha ) *n.* group of subordinate deities belonging to the tutelary deity Aṇimā अणिमाव्यूहमावेष्ट्य प्रथमावरणे क्रमात् । ऐन्द्रा …पितामह: । प्रथमावरणं प्रोक्तम् ( कथितं चाणिमाव्यूहम् ) LiṅgaP. ii. 27. 98.

**अणिमासिद्धि** ( aṇimā-siddhi ) *f.* deified supernatural power Aṇimā देव्या: पृष्ठभागेऽणिमासिद्धि: SetuBa. 84. 12.

**अणिमोक्ष** ( aṇi-mokṣa ) *m.* slipping away of the pin fixed at the end of the axle (of a cart) अक्ष: …अणिमोक्षादनुपाङ्गाद् … अन्तरावसानमापद्यते CaraS. iii. 3. 38 (1941 Ed.)

**अणिम्नी** ( aṇimnī ) *adj.* (*f.*) of very small or minute size (नाड्य:) तद् यथा सहस्रधा केशो विपाटितस्तावदण्व्य: पिङ्गलस्याणिम्न्यस्तिष्ठन्ति S'āṅkhāĀ. 6. 19 (25. 15)

**अणिलावाड** ( aṇilā-vāḍa ) *m.* village Aṇilāvāḍa ( राजेन्द्रो वस्त्रभाण्डाधिकारिणम् । आनेतुमादिशद्वस्त्राणि ) अणिलावाडजातानि Mānaso. iii. 6. 1019.

**अणिष्ठ** ( áṇ-iṣṭha ) *adj.* [*f.* -ā] (superlative) the smallest or the most minute त्रेधा तण्डुलान् विभजेत् … येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुम्